# sItAShTottarashatanAmAvaliH

# સીતાષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : sItAShTottarashatanAmAvaliH 2

File name : sItAShTottarashatanAmAvaliH.itx

Category : devii, aShTottarashatanAmAvalI, sItA, raama, devI

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : brahmayAmala shrIrAmarahasya

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 2, 2020

*sanskritdocuments.org*

# સીતાષ્ટોત્તરશતનામાવલિઃ

સીતાયૈ નમઃ । સીરધ્વજસુતાયૈ । સીમાતીતગુણોજ્જ્વલાયૈ ।
સૌન્દર્યસારસર્વસ્વભૂતાયૈ । સૌભાગ્યદાયિન્યૈ । દેવ્યૈ ।
દેવાર્ચિતપદાયૈ । દિવ્યાયૈ । દશરથસ્નુષાયૈ । રામાયૈ ।
રામપ્રિયાયૈ । રમ્યાયૈ । રાકેન્દુવદનોજ્જ્વલાયૈ । વીર્યશુલ્કાયૈ ।
વીરપત્ન્યૈ । વિયન્મધ્યાયૈ । વરપ્રદાયૈ । પતિવ્રતાયૈ ।
પઙ્ક્તિકણ્ઠનાશિન્યૈ । પાવનસ્મૃત્યૈ નમઃ ॥ ૨૦

વન્દારુવત્સલાયૈ નમઃ । વીરમાત્રે । વૃતરઘૂત્તમાયૈ ।
સમ્પત્કર્યૈ । સદાતુષ્ટાયૈ । સાક્ષિણ્યૈ । સાધુસમ્મતાયૈ । નિત્યાયૈ ।
નિયતસંસ્થાનાયૈ । નિત્યાનન્દાયૈ । નુતિપ્રિયાયૈ । પૃથ્વ્યૈ ।
પૃથ્વીસુતાયૈ । પુત્રદાયિન્યૈ । પ્રકૃત્યૈ । પરાયૈ । હનુમત્સ્વામિન્યૈ ।
હૃદ્યાયૈ । હૃદયસ્થાયૈ । હતાશુભાયૈ નમઃ ॥ ૪૦

હંસયુક્તાયૈ નમઃ । હંસગત્યૈ । હર્ષયુક્તાયૈ । હતાસુરાયૈ ।
સારરૂપાયૈ । સારવચસે । સાધ્વ્યૈ । સરમાપ્રિયાયૈ । ત્રિલોકવન્દ્યાયૈ ।
ત્રિજટાસેવ્યાયૈ । ત્રિપથગાર્ચિન્યૈ । ત્રાણપ્રદાયૈ । ત્રાતકાકાયૈ ।
તૃણીકૃતદશાનનાયૈ । અનસૂયાઙ્ગરાગાઙ્કાયૈ । અનસૂયાયૈ ।
સૂરિવન્દિતાયૈ । અશોકવનિકાસ્થાનાયૈ । અશોકાયૈ ।
શોકવિનાશિન્યૈ નમઃ ॥ ૬૦

સૂર્યવંશસ્નુષાયૈ નમઃ । સૂર્યમણ્ડલાન્તસ્થવલ્લભાયૈ ।
શ્રુતમાત્રાઘહરણાયૈ । શ્રુતિસન્નિહિતેક્ષણાયૈ । પુણ્યપ્રિયાયૈ ।
પુષ્પકસ્થાયૈ । પુણ્યલભ્યાયૈ । પુરાતનાયૈ । પુરુષાર્થપ્રદાયૈ ।
પૂજ્યાયૈ । પૂતનામ્ન્યૈ । પરન્તપાયૈ । પદ્મપ્રિયાયૈ । પદ્મહસ્તાયૈ ।
પદ્માયૈ । પદ્મમુખ્યૈ । શુભાયૈ । જનશોકહરાયૈ ।
જન્મમૃત્યુશોકવિનાશિન્યૈ । જગદ્રૂપાયૈ નમઃ ॥ ૮૦

જગદ્વન્દ્યાયૈ નમઃ । જયદાયૈ । જનકાત્મજાયૈ । નાથનીયકટાક્ષાયૈ ।

નાથાયૈ । નાથૈકતત્પરાયૈ । નક્ષત્રનાથવદનાયૈ । નષ્ટદોષાયૈ ।
નયાવહાયૈ । વહ્નિપાપહરાયૈ । વહ્નિશૈત્યકૃતે । વૃદ્ધિદાયિન્યૈ ।
વાલ્મીકિગીતવિભવાયૈ । વચોઽતીતાયૈ । વરાઙ્ગનાયૈ । ભક્તિગમ્યાયૈ ।
ભવ્યગુણાયૈ । ભાન્ત્યૈ । ભરતવન્દિતાયૈ । સુવર્ણાઙ્ગ્યૈ ॥ ૧૦૦

સુખકર્યૈ નમઃ । સુગ્રીવાઙ્ગદસેવિતાયૈ । વૈદેહ્યૈ ।
વિનતાઘૌઘનાશિન્યૈ । વિધિવન્દિતાયૈ । લોકમાત્રે ।
લોચનાન્તઃસ્થિતકારુણ્યસાગરાયૈ । શ્રીરામવલ્લભાયૈ નમઃ ॥ ૧૦૮

સીતામુદારચરિતાં વિધિશમ્ભુવિષ્ણુ-
વન્દ્યાં ત્રિલોકજનનીં નતકલ્પવલ્લીમ્ ।
હૈમામનેકમણિરઞ્જિતકોટિભાસ-
ભૂષોત્કરામનુદિનં લલિતાં નમામિ ॥

ઉન્મૃષ્ટં કુચસીમ્નિ પત્રમકરં દૃષ્ટ્વા હઠાલિઙ્ગનાત્
કોપો માસ્તુ પુનર્લિખામ્યમુમિતિ સ્મેરે રઘૂણાં વરે ।
કોપેનારુણિતોઽશ્રુપાતદલિતઃ પ્રેમ્ણા ચ વિસ્તારિતો
દત્તે મૈથિલકન્યયા દિશતુ નઃ ક્ષેમઃ કટાક્ષાઙ્કુરઃ ॥

ઇતિ સીતાષ્ટોત્તરશતનામાવલિઃ સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*sItAShTottarashatanAmAvaliH*
pdf was typeset on April 2, 2020

Please send corrections to *sanskrit@cheerful.com*